# ॥ જીવન્મુક્તસ્તોત્રમ્ ॥

.. jIvanmuktastotram ..

sanskritdocuments.org

August 27, 2017

# .. jIvanmuktastotram ..

# ॥ જીવન્મુક્તસ્તોત્રમ્ ॥

## Sanskrit Document Information

Text title : jIvanamuktastotram

File name : jIvanamuktastotram.itx

Category : misc

Location : doc_z_misc_general

Proofread by : Jonathan Wiener wiener78 at sbcglobal.net

Source : shrutiratnAvalI

Latest update : August 27, 2017

Send corrections to : Sanskrit@cheerful.com

This text is prepared by volunteers and is to be used for personal study and research. The file is not to be copied or reposted without permission, for promotion of any website or individuals or for commercial purpose.

**Please help to maintain respect for volunteer spirit.**

August 27, 2017

*sanskritdocuments.org*

અખણ્ડં પરમાદ્વૈતં સ્વતન્ત્રં પરમં શિવમ્ ।
સર્વગં સચ્ચિદાનન્દં જીવન્મુક્તં નમામ્યહમ્ ॥ ૧॥

નિરાલમ્બં નિરાતઙ્કં દ્વૈતાદ્વૈતવિવર્જિતમ્ ।
સર્વાત્માનં સદા શાન્તં જીવન્મુક્તં નમામ્યહમ્ ॥ ૨॥

ચિન્મયં પરમં તીર્થં સુનિત્યં નિત્યનિર્મલમ્ ।
બ્રહ્મચિત્તં સતાં સેવ્યં જીવન્મુક્તં નમામ્યહમ્ ॥ ૩॥

સર્વસદ્ગુણસમ્પૂર્ણં શુદ્ધસત્ત્વમયં શુભમ્ ।
જન્મમૃત્યુજરાતીતં જીવન્મુક્તં નમામ્યહમ્ ॥ ૪॥

ધન્યં ધન્યં સદા ધન્યં સ્વરૂપાવસ્થિતં પરમ્ ।
સુખરૂપં સદા પૂર્ણં જીવન્મુક્તં નમામ્યહમ્ ॥ ૫॥

દ્વેષ્યં નાસ્તિ પ્રિયં નાસ્તિ યસ્ય નાસ્તિ શુભાશુભમ્ ।
સ્વાર્થહીનં સમં શુદ્ધં જીવન્મુક્તં નમામ્યહમ્ ॥ ૬॥

ભવન્તિ યસ્ય કર્માણિ લોકકલ્યાણહેતવે ।
માયાતીતં ગુણાતીતં જીવન્મુક્તં નમામ્યહમ્ ॥ ૭॥

ઈશ્વરં સર્વવિશ્વાનાં સર્વવિશ્વસ્વરૂપકમ્ ।
સર્વોપાધિવિહીનં તં જીવન્મુક્તં નમામ્યહમ્ ॥ ૮॥

ચિત્સ્વભાવં સ્વતન્ત્રં ચ હેયોપાદેયવર્જિતમ્ ।
નિષ્કલં પરમાનન્દં જીવન્મુક્તં નમામ્યહમ્ ॥ ૯॥

નૈવ નિન્દાપ્રશંસાભ્યાં યસ્ય વિક્રિયતે મનઃ ।
આત્મતૃપ્તં સદા તુષ્ટં જીવન્મુક્તં નમામ્યહમ્ ॥ ૧૦॥

નિત્યં જાગ્રદવસ્થાયાં સુપ્તવદ્ યોઽવતિષ્ઠતે ।
પુણ્યાપુણ્યવિહીનં તં જીવન્મુક્તં નમામ્યહમ્ ॥ ૧૧॥

માયા નાસ્તિ જગન્નાસ્તિ યસ્ય જ્ઞાનમહોદધેઃ ।
સર્વદોષવિનિર્મુક્તં જીવન્મુક્તં નમામ્યહમ્ ॥ ૧૨॥

રાગદ્વેષભયાદીનામનુરૂપં ચરન્નપિ ।
અન્તર્વ્યોમવદાચ્છન્નં જીવન્મુક્તં નમામ્યહમ્ ॥ ૧૩॥

યસ્ય નાહઙ્કૃતો ભાવો બુદ્ધિર્યસ્ય ન લિપ્યતે ।

કુર્વતોઽકુર્વતો વા તં જીવન્મુક્તં નમામ્યહમ્ ॥ ૧૪॥

યસ્માન્નોદ્વિજતે લોકો લોકાન્નોદ્વિજતે ચ યઃ ।
હર્ષામર્ષભયોન્મુક્તં જીવન્મુક્તં નમામ્યહમ્ ॥ ૧૫॥

યઃ સમસ્તાર્થજાલેષુ વ્યવહાર્યપિ શીતલઃ ।
નિર્દ્વન્દ્વં વાસનાહીનં જીવન્મુક્તં નમામ્યહમ્ ॥ ૧૬॥

ચૈત્યવર્જિતચિન્માત્રે પદે પરમપાવને ।
અક્ષુબ્ધચિત્તં વિશ્રાન્તં જીવન્મુક્તં નમામ્યહમ્ ॥ ૧૭॥

ઇદં જગદહં સોઽયં દૃશ્યજાતમવાસ્તવમ્ ।
યસ્ય ચિત્તે ન સ્ફુરતિ જીવન્મુક્તં નમામ્યહમ્ ॥ ૧૮॥

સ્વયમેવ સ્વયં હંસં સ્વયમેવ સ્વયં સ્થિતિમ્ ।
સ્વયમેવ સ્વયં પશ્યન્ જીવન્મુક્તં નમામ્યહમ્ ॥ ૧૯॥

બ્રહ્મભૂતઃ પ્રશાન્તાત્મા બ્રહ્માનન્દમયઃ સુખી ।
સ્વચ્છરૂપો મહામૌની જીવન્મુક્તં નમામ્યહમ્ ॥ ૨૦॥

શુદ્ધચૈતન્યરૂપાત્મા સર્વસઙ્ગવિવર્જિતઃ ।
નિત્યાનન્દઃ પ્રસન્નાત્મા જીવન્મુક્તં નમામ્યહમ્ ॥ ૨૧॥

ઇતિ જીવન્મુક્તસ્તોત્રં સમ્પૂર્ણમ્ ।

Proofread by Jonathan Wiener wiener78 at sbcglobal.net

.. jIvanmuktastotram ..

Searchable pdf was typeset using generateactualtext feature of XƎLaTeX 0.99996

on August 27, 2017

Please send corrections to *sanskrit@cheerful.com*